मनुविचिन्तयमाने यद्भुतेदनेन बुद्धज्ञानम्। अप्येव नाम वयमपि व्याकरणं प्रतिलभेमह्यनुत्तरायां सम्यक्संबोधाविति[1]॥

अथ खलु भगवानायुष्मन्तमानन्दमामन्त्रयते स्म। भविष्यसि त्वमानन्दानागते ऽध्वनि सागरवरधर[2]बुद्धिविक्रीडिताभिज्ञो नाम तथागतो ऽर्हन्सम्यक्संबुद्धो[3] विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। द्वाषष्टीनां बुद्धकोटीनां[4] सत्कारं कृत्वा गुरुकारं[5] माननां पूजनां[6] च कृत्वा तेषां बुद्धानां भगवतां सद्धर्मं[7] धारयित्वा शासनपरिग्रहं च कृत्वानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यसि[8]। स त्वमानन्द अनुत्तरां सम्यक्संबुद्धः समानो विंशतिगङ्गानदीवालुकासमानि[9] बोधिसत्त्वकोटीनयुतशतसहस्राणि परिपाचयिष्यस्यनुत्तरायां सम्यक्संबोधौ। समृद्धं[10] च ते बुद्धक्षेत्रं भविष्यति वैडूर्यमयं च[11]। अनवनामितवैजयन्ती च नाम सा[12] लोकधातुर्भविष्यति। मनोज्ञशब्दाभिगर्जितश्च नाम स कल्पो भविष्यति। अपरिमितांश्च कल्पांस्तस्य भगवतः सागरवरधरबुद्धिविक्रीडिताभिज्ञस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यायुष्प्रमाणं भविष्यति येषां कल्पानां न शक्यं गणनया पर्यन्तो ऽधिगन्तुम्।

1) वित्यर्थः A.

2) सागरवरबुद्ध O. So too in the sequel.

3) B. K. add लोके.

4) कोटीनियुतशतसहस्राणां B. K.

5) A. W. add कृत्वा.

6) पूजनामर्चनामवचायनां Cb. पूजनमपचयनां O. च is put in after तेषां in K. च कृत्वा left out in O.

7) र्य A. B. Cb. W. र्मं K.

8) Sic O. In the other MSS. अभिसंभोत्स्यसि स त्वमानन्द wanting.

9) वालिकोपमा Ca. O. वालुकोपमा Cb.

10) संवृद्धं O.

11) Left out in K. O.

12) तश्च स B. K.

अनन्तमौपम्यनिदर्शनेहि बुद्धान अग्र्यां करियाण पूजाम् ।
प्रापुणिष्यन्ति ममाग्रबोधिं स्थिहित्व चरिमे[1]स्मि समुच्छ्रयस्मिन् ॥ १३ ॥

एकेन नामेन दशद्दि[2]शासु क्षणस्मि एकस्मि तथा मुहूर्ते ।
निषद्य च द्रुमप्रवराण[3] मूले बुद्धा भविष्यन्ति स्पृशित्व ज्ञानम् ॥ १४ ॥

एकं च तेषामिति नाम भेष्यति रत्नस्य[4] केतूतिह[5] लोकि विश्रुताः ।
समानि क्षेत्राणि वराणि[6] तेषां समो गणाः[7] श्रावकबोधिसत्त्वाः ॥ १५ ॥

ऋद्धिप्रभूता इह सर्वि लोके समन्ततस्ते दशसु द्दि[8]शासु ।
धर्मं प्रकाशेत्व यदापि[9] निर्वृताः सद्धर्मु तेषां सममेव स्थास्यति[10] ॥ १६ ॥

अथ खलु ते शैक्षाशैक्षाः श्रावका भगवतोऽन्तिकात्संमुखं स्वानि स्वानि व्याकरणानि श्रुत्वा तुष्टा उदग्रा आत्तमनस्काः[11] प्रमुदिताः प्रीतिसौमनस्यजाता भगवन्तं गाथाभ्या[12]मध्यभाषन्त ॥

तृप्ता स्म लोकप्रद्योत श्रुत्वा व्याकरणं इदम्[13] ।
अमृतेन यथा सिक्ताः सुखिता स्म तथागत ॥ १७ ॥

---

1) मे A. B. K. W. म Cb. O. ये Ca.
2) दि् A. B. O. Cb. K. W. द्दि Ca.
3) चो (च B) द्रुमवरराज B. K.
4) रतनस्य K.
5) केतूतिह A. केतूनिह B. Cb. K. केतूनिभिह W. केतूरिह O.
6) क्षेत्राप्रवरा K.
7) समो गणाः K. O. समा गणाः the rest.
8) All but O. दि.
9) All have सदा except O.
10) इति added in all but A. W. O.
11) मनसः Ca. O.
12) भिर Cb. O.
13) म B. Cb. K. W.

ये चापि राजपुरुषाः[1] कुर्यात्तेह्यि न संस्तवम् ।
चण्डालमुष्टिकैः शौण्डिस्तीर्थिकैश्चापि सर्वशः ॥ ३ ॥
अभि[2]मानींश्च सेवेत विनयेदा[3]गमस्थितान् ।
अर्हत्तसंमतान्भिक्षूनदुःशीलांश्चैव वर्जयेत् ॥ ४ ॥
भिक्षुणीं वर्जयेन्नित्यं हास्यसंलापगोचराम्[4] ।
उपासिकाश्च वर्जेत[5] प्राकटा या अवस्थिताः[6] ॥ ५ ॥
या निर्वृतिं गवेषन्ति दृष्टे धर्मे उपासिकाः ।
वर्जयेत्संस्तवं ताभिः[7] आचारो अयमुच्यते ॥ ६ ॥
यश्चै[8]नमुपसंक्रम्य धर्मं पृच्छे ऽग्रबोधये ।
तस्य भाषेत्सदा धीरो अनोलीनो अनिश्रितः ॥ ७ ॥
स्त्री पण्डकाश्च ये सत्त्वाः संस्तवं तैर्विवर्जयेत् ।
कुलेषु चापि वधुकां[9] कुमार्यश्च विवर्जयेत् ॥ ८ ॥

---

1) षां K. राज्ञः पुरुषा ये भोन्ति O.

2) भि A. B. K. W. धि Cb. O.

3) विनयेनागम A. B. W. विनयेदागमे Cb. विनयेनागमे K. आगमे विनये स्थित्वा (intended स्थितः?) O.

4) णयो and रा (Skr. राः) O., preferable.

5) All but O. वर्जयेत्.

6) तान् Cb. तां K. न वस्थिताः O

7) भि A. B. K. W. भिः । Cb. O.

8) व Cb.

9) वधुकाश्चापि O

